# असि बन्धः

धीरधीर वरस्तुत्य देवदेव सवप्रिय ।
वदेन्दिरापते त्वत् को गति रक्षितवासव ॥ 45 ॥




धीरेति । धीर धीर - अतिधृष्ट । वरैः - सनकादिभिः स्तुत्य । देवदेव - सर्वेश्वर । सवप्रिय-यज्ञप्रिय । रक्षित वासव-स्पष्टं । हे इन्दिरापते त्वत्-त्वत्तः गतिः कः? वद् ! त्वां विना मम गतिः नास्तीत्यर्थः ।

* * * बन्धम् ।

# सप्तमं गोमूत्रिका बन्ध प्रकरणम्

## अयं तु गोमूत्रिका बन्धस्साधारणः

देवताराधितां श्रीदां वन्दे सादरमिन्दिराम् ।

देहितापाधिदा श्रीघ्नां वज्रि सादरवन्दिताम् ।। (Sloka 9)

अयमिति स्पष्टोऽर्थः ।




## समानवृत्त पादानुलोम प्रतिलोम गोमूत्रिका बन्धः ।

अनुलोम लेखनिरयुः प्रथमश्लोकः ।

सारसायनगा सेव्या पातु सा सुवनावनी ।

दासतानतपादा या नीलसारसलोचना ।। 46 ।।

प्रतिलोमलेखनिरयुः द्वितीयस्तु ।

काचनाऽसमसारानी चादान्तातनुतापदा ।

देवतावतु साऽकोपा संसेव्या ननु सागसा ।। 47 ।।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| → | सा | र | सा | य | न | गा | से | व्या | |
| | सा | ग | सा | नु | न | व्या | से | सं | ← |
| → | पा | तु | सा | सु | व | ना | व | नी | |
| | पा | को | सा | तु | व | ता | व | दे | ← |
| → | दा | स | ता | न | त | पा | दा | या | |
| | दा | प | ता | नु | त | न्ता | दा | चा | ← |
| → | नी | ल | सा | र | स | लो | च | ना | |
| | नी | रा | सा | म | स | ना | च | का | ← |

सारसेति । सारस रुपं यदयनं - स्थानं तत् गा । दासता दाससमूहः तया नतपादा सा या लक्ष्मीः । शिष्टं स्पष्टम् । अयनं निलये मार्गे । या स्त्रियां यान मञ्जर्योः शोभा लक्ष्म्योश्चेति कोशः । नीचा ये अदान्ताः तेषां अधिकतापदा । देवता-लक्ष्मीः सगसा - अपराधिना संसेव्या ननु-पुरुषकारत्वेना श्रयणियृया खलु । शिष्टं स्पष्टम् ।

इयं समानवृत्तार्धानुलोम प्रतिलोम गोमूत्रिकाऽपि भवति ।

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| → | सा | र | सा | य | न | गा | से | व्या | पा | तु | सा | सु | व | ना | व | नी | |
| | सा | ग | सा | नु | न | व्या | से | सं | पा | को | सा | तु | व | ता | व | दे | ← |
| → | दा | स | ता | न | त | पा | दा | या | नी | ल | सा | र | स | लो | च | ना | |
| | दा | प | ता | नु | त | न्ता | दा | चा | नी | रा | सा | म | स | ना | च | का | ← |

Alternate lines forms the slokas. First sloka from top and from left to right Second sloka form bottom and from right to left.

# समानवृत्त पादानुलोम गोमूत्रिका बन्धः

प्रथम श्लोकः

पातुमामक्षयस्थाना - पादनात् कमलापतिः ।

देवनाकमलेनाशा केवलानुभवेऽपिवा ॥ 48 ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| पा | तु | मा | म | क्ष | य | स्था | ना |
| रा | तु | मा | म | द्य | य | स्या | ना |
| पा | द | नात् | क | म | ला | प | तिः |
| ना | द | रः | क | म | ला | क्ष | तिः |
| दे | व | ना | क | म | ले | ना | शा |
| पा | व | नी | क | म | ले | सा | शा |
| के | व | ला | नु | भ | वे | पि | वा |
| मा | व | रा | नु | भ | वे | त्र | वा |

द्वितियूय श्लोकस्तु

रातुमामद्य यस्याना - नादरः कमलाऽक्षतिः ।

पावनी कमलेसाशा मा वरानुभवेऽत्रवा ॥ 49 ॥

इयं समान वृत्तार्धानुलोम गोमूत्रिकाऽपि भवति । पात्विति । अक्षय स्थानापादनात्-परम पदप्रदानात् हे देव नाकमले-स्वर्गरूप नरके केवलानुभवे-कैवल्ये वा-मे नाशा । रात्विति । यस्याः अनादरो न भक्तेषु इति शेषः । कमलेसाशा मा अत्रवा एहि केवा - वरानुभवे वा-आमुष्मिकेवा-मां बुद्धिं रातु-सा यत्र बुद्धिं जायति तदेव मे स्यात् इति भावः शिष्टं स्पष्टम् ।

इयं समान वृत्तार्धानुलोम गोमूत्रिकाऽपि भवति ।



Read this way also in both forms.
(गोमूत्रिका)

| | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| पा | तु | मा | म | क्ष | य | स्था | ना | पा | द | नात् | क | म | ला | प | तिः |
| रा | तु | मा | म | द्य | य | स्या | ना | ना | द | रः | क | म | ला | क्ष | तिः |
| दे | व | ना | क | म | ले | ना | शा | के | व | ला | नु | भ | वे | पि | वा |
| पा | व | नी | क | म | ले | सा | शा | मा | व | रा | नु | भ | वे | त्र | वा |

# भिन्नवृत्तार्धानुलोम गोमूत्रिका बन्धः

प्रथम श्लोकः

क्षीरपयोधि भवाखिलसेव्या मारजनन्यसुरक्षयचित्ता ।

नामजपप्रहतादरदोषा पातु दयानिधि रक्षय शोभा ॥ 50 ॥

द्वितिय्य श्लोकः

स्फुरद्दयोच्चाभवखिन्न सेव्या माया जघन्यस्थिरकायसत्ता ।

श्रीमत्सु पद्मा हरिदत्तदोषा पायादमानिस्थिर दायजृंभा ॥ 51 ॥

| | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क्षी | र | प | यो | धि | भ | वा | खि | ल | से | व्या | मा | र | ज | न | न्य | सु | र | क्ष | य | चि | त्ता |
| स्फु | र | द्द | यो | च्चा | भ | व | खि | न्न | से | व्या | मा | या | ज | घ | न्य | स्थि | र | का | य | स | त्ता |
| ना | म | ज | प | प्र | ह | ता | द | र | दो | षा | पा | तु | द | या | नि | धि | र | क्ष | य | शो | भा |
| श्री | म | त्सु | प | द्मा | ह | रि | द | त्त | दो | षा | पा | या | द | मा | नि | स्थि | र | दा | य | जृं | भा |

क्षीरेति । स्पष्टः अर्थः । स्फुरदिति । स्फुरत् दयोच्चा अतिशयित दयया उच्चा - सर्वातिशायिनीत्यर्थः । हरिदत्तदोषा - भगवति निक्षिप्त भुजा (दोषा) अमानिस्थिरदाय जृंभा - स्थिरस्य स्थिरफलस्य दा-दानं अयं जृभं शुभावह विधिवर्धनञ्च अमनिषु यस्यास्सा । शिष्टं स्पष्टम् । दास्त्रियां क्षान्ति दानयोः । जृंभस्तु जृंभणे इति नानार्थ रत्नमाला ।

अयं हि भिन्न वृत्त पादानुलोम गोमूत्रिका बन्धोऽपि भवति ।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| श्री | र | प | यो | धि | भ | वा | खि | ल | से | व्या |
| स्फु | र | द्द | यो | च्चा | भ | व | खि | न्न | से | व्या |
| मा | र | ज | न | न्य | सु | र | क्ष | य | चि | त्ता |
| मा | या | ज | घ | न्य | स्थि | र | का | य | स | त्ता |
| ना | म | ज | प | प्र | ह | ता | द | र | दो | षा |
| श्री | म | त्सु | प | द्मा | ह | रि | द | त्त | दो | षा |
| पा | तु | द | या | नि | धि | र | क्ष | य | शो | भा |
| पा | या | द | मा | नि | स्थि | र | दा | य | जृं | भा |

इयं भिन्न वृत्तानुलोम गोमूत्रिका वृत्तान्तरेणापि लिख्यते यथा ।

प्रथम श्लोक:

सुरनुता कमला परदेवता त्वजितचित्त रमा नलिनोद्भवा ।

अतुल संहननावतु मानिता भुवनतापकरासुरनाशिनी ।। 52 ।।

द्वितियुयश्लोकस्तु

मारमाता नमत्पापहा देवता पूजिताचिन्नरज्ञान दानोत्सवा ।

पातु दासंजनम्पावनी मादृता जीवजातानुकंपा सुरेनावनी ।। 53 ।।

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| सु | र | नु | ता | क | म | ला | प | र | दे | व | ता |
| मा | र | मा | ता | न | म | त्पा | प | हा | दे | व | ता |
| त्व | जि | त | चि | त्त | र | मा | न | लि | नो | द्भ | वा |
| पू | जि | ता | चि | न्न | र | ज्ञा | न | दा | नो | त्स | वा |
| अ | तु | ल | सं | ह | न | ना | व | तु | मा | नि | ता |
| पा | तु | दा | सं | ज | न | म्पा | व | नी | मा | दृ | ता |
| भु | व | न | ता | प | क | रा | सु | र | ना | शि | नी |
| जी | व | जा | ता | नु | क | म्पा | सु | रे | ना | व | नी |

इयं अर्धानुलोमगोमूत्रिकाऽपि भवति

| | | | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सु | र | नु | ता | क | म | ला | प | र | दे | व | ता | त्व | जि | त | चि | त्त | र | मा | न | लि | नो | द्भ | वा |
| मा | र | मा | ता | न | म | त्पा | प | हा | दे | व | ता | पू | जि | ता | चि | न्न | र | ज्ञा | न | दा | नो | त्स | वा |
| अ | तु | ल | सं | ह | न | ना | व | तु | मा | नि | ता | भु | व | न | ता | प | क | रा | सु | र | ना | शि | नी |
| पा | तु | दा | सं | ज | न | म्पा | व | नी | मा | दृ | ता | जी | व | जा | ता | नु | क | म्पा | सु | रे | ना | व | नी |

सुरनुतेति । अजितस्य - विष्णोः चित्ते रमत इत्यजितचित्तरमा । अचितः ज्ञानशून्याः ये नराः तेषां ज्ञानदानोत्सवा । देवता-पूजिता-सर्वदेव पूजिता । सुरेनं - इन्द्रं अवतीति सुरेनावनी । मादृता सर्वैरिति शेषः । पावनी-सर्वान् परिशुद्धयन्तीति । मा-लक्ष्मीः दासजनं पातु ।

# भिन्नवृत्त पादानुलोमप्रतिलोम गोमूत्रिका बन्धः

(इयं गोमूत्रिका अर्तरूपा न भवति ।)

अनुलोमतया लेखनिरय्युः प्रथमश्लोकः ।

कलितामरमोद हरे द्विरदासमभीदम केशव देवपते ।

तदरातिततं करुणाकर भो दह मेद्य भवं कुटिलानुभवम् ।। 54 ।।

प्रतिलोमतया लेखनिरयो द्वितिय्य श्लोकस्तु ।

शुभं कलान्मा कुसुभव्य मे दद स्थिर प्रणामाकलित स्थिरामृत ।

सपक्ष देवाशर मन्युभीम स स्फुरत्करेन्द्रादर रक्षिताजक ।। 55 ।।

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| क | लि | ता | म | र | मो | द | ह | रे | द्वि | र | दा |
| क | ज | ता | क्षि | र | र | द | न्द्रा | रे | त्क | र | स्फु |
| स | म | भी | द | म | के | श | व | दे | व | प | ते |
| स | म | भी | न्यु | म | र | श | वा | दे | क्ष | प | स |
| त | द | रा | ति | त | तं | क | रु | णा | क | र | भो |
| त | मृ | रा | स्थि | त | लि | क | मा | णा | प्र | र | स्थि |
| द | ह | मे | द्य | भ | वं | कु | टि | ला | नु | भ | वं |
| द | द | मे | व्य | भ | सु | कु | न्मा | ला | म्क | भ | शु |

कलितेति । द्विरदासम भीदम-द्विरदस्य गजेन्द्रस्य या असमा भीः - नक्रजातं भयं - तत् दमयतीति नाशयति इति तथोक्तम् । तैः अरातिभिः-काम क्रोध लोभ मोह मद मात्सर्यरूप षडात्मशत्रुभिः ततं व्याप्तं । तच्च प्रसिद्धाराति वैलक्षण्यं जोत्यते । कुटिलानुभवं-असह्यानुभवं भवं दह ।

शुभेति । मा कु सुभव्य - लक्ष्मी भूम्यो मङ्गळ स्वरूप । स्थिरेत्यादि-स्थिरप्रणामः शरणागतिः तेन कलित स्थिरामृतं मोक्षः येन सः । सपक्षस्त सहाया देवा येन सः । आशराणां मन्युना भीमं राक्षसभयं करत्यर्थः । सेत्यादि-से-वायौ स्फुरत्करेन्द्र च आदरः यस्य । रक्षितौ अजकौ शिवचतुर्मुखौ येन । हे भगवन् मे शुभं कलां-विद्यां च दद ।। सः पुंस्यामासुते वायौ इति नानार्यमाला । शिष्टं स्पष्टम् ।

Alternate lines forms the slokas. First Sloka from top and from left to right Second sloka from bottom from right to left.

# भिन्नवृत्तार्धानुलोम प्रतिलोम गोमूत्रिका बन्धः

(इयं गोमूत्रिका पादरूपा न भवति)

अनुलोमतया लेखनिरय्यः प्रथम श्लोकः ।

नाकपकाल जलेश कुभेरा मारहवारि पितामह मुख्याः ।

यामनपायगुणामभिरामां हन्त भजन्ति हि सा कमलाऽव्यात् ॥ 56 ॥

प्रतिलोमतया लेचनिरय्यः द्वितिय्य श्लोकस्तु ।

विमुग्धमव्यात् पिकवागरम्मा रामा कुशीलेचल मापदीना ।

नीलाळकश्री हि भुजङ्गतल्पा माताभिशोणाम्घ्रियमानपाया ॥ 57 ॥

| | | | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| → | ना | क | प | का | ल | ज | ले | श | कु | भे | रा | मा | र | ह | वा | रि | पि | ता | म | ह | मु | ख्याः | |
| | ना | दी | प | मा | ल | च | ले | शी | कु | मा | रा | म्म | र | ग | वा | क | पि | व्यात् | म | ग्ध | मु | वि | ← |
| → | या | म | न | पा | य | गु | णा | म | भि | रा | मा | म्हं | त | भ | ज | न्ति | हि | सा | क | म | ला | व्यात् | |
| | या | पा | न | मा | य | म्घ्रि | णा | शो | भि | ता | मा | ल्पा | त | ङ्गं | ज | भु | हि | श्री | क | ळ | ला | नी | ← |

नाकेति । नाकप-काल जलेश कुभेराः इन्द्र यम-वरुण-वैश्रवणाः मार-मारस्य, हवस्य-यागस्य च अरिः (मारहवारि) रुद्रः इत्यर्थः । स च पितामहश्चतुर्मुखौ येषां ते एतद्विशेषणं इन्द्रादीनां । हन्त इति हर्षे । नीला अनकश्रीः यस्याः सा । अभिशोणः सम्यक् अरुणः अंघ्रियमः चरणद्वयं यस्याः सा । माता लोकमाता इत्यर्थः । इना-स्वामिनी । रामा-स्त्री विशेषण वलात् लक्ष्मीः इत्यर्थः । मा-माम् आपदि-आपत्काले । अरं शीघ्रं अव्यात् । शिष्टं स्पष्टं । कुशीलेचलमित्यपि अस्मत् शब्द विशेषणं । इना-मन्मथेन चलः अस्थिरस्वभाव इति इचलः । कुशीलश्चासापिचलश्चेति समासः । इकारः फणिरत्नार्चिषु अग्रतोर्थगुहान्धयोः हरे करेणौ कक्षान्ते निशाकर करे स्मरे ।

इनो भूपे रवौ पुंसि धनिक स्वामिनोस्त्रिषु। इति नानार्थरत्नमाला । यमस्तु यमळेन्तके । इति च ।

# अष्टमं - नाग बन्ध प्रकरणं

## कुण्डलित एक नाग बन्धः

स्वामि श्रीरङ्गवीक्षा महितयतिपतिर्यो महानस्तदोषो विद्वत्सम्मोददानस्थिरसुरधरणीरुट्क्षमक्षेमधाम ।

तं श्रीवेदोदधीन्दुं सलिलजलपनन्दीनपं वीतरुट्कं तद्धीमन्तन्नताश्रीक्षि दमदशविदं धीप्रदं सन्नमामि ॥ 58 ॥




व्या-स्वामित्यादि । सर्वशेषी श्री रंगनाथ कटाक्ष लब्ध महात्मयो यो यतिपतिः श्रीनिवास-महादेशिक इत्यर्थः । सलिलज लपनं-पद्मसदृश मुखं-तद्धीमन्तं-प्रसिद्ध सार्वज्ञय शलिनं । अदशविदं । न विद्यते दशा बालयास्था - यस्य सः अदशः युवात् कुमार इत्युक्त त्वान्नित्य युवत्वेन बायावस्था रहित इति भावः । तं वेत्तीति-अदशवित् एवं भूतं । तं आचार्यं नमामीति । शिष्टं स्पष्टं । कवेराचार्य भूत श्रीनीवास यतीन्द महा देशिक विषयोयं श्लोकः ।

# साधारण नाग बन्धः

रक्षराम हताशेष -

राक्षस श्रीनिकेतन ।

न त्वां विना गतिर्मेस्ति

दासीभूतामराक्षर ॥ *

(दासीभूत + अमर + अक्षर)

सकलैश्शिरसाधार्या

धूकिस्सोदधिजापदः ।

सभयं पातुमां घोर

वृजिनोदधिजापदः ॥ 59 ॥







* This sloka has been scored out by the Kavi, in the manuscript perhaps thinking it is duplicated. Hence number has not been given.